# हरिभास्कर-अग्निहोत्रिकृत-परिभाषाभास्करदिशा यदागमपरिभाषाविमर्शः

प्रीतम बेरा

प्रबन्धसारः

परितः सर्वतो भाष्यतेऽनयेति परिभाषा। परिपूर्वकाद् भाष्-धातोः घञि ततष्टापि परिभाषाशब्दो निष्पद्यते। अनियमलेशमसहमानेऽस्मिन्शास्त्रे उत्पन्नानियमविमोका हि परिभाषाः। परिभाषाग्रन्थेषु मूर्धन्यस्थानम् अवरुह्य विराजते आचार्यनागेशविरचितः परिभाषेन्दुशेखरः। परन्तु तदितरेऽपि केचन ग्रन्थाः स्ववैशिष्ट्येन विदुषां दृष्टीश्वरीकृष्यन्ते। तेषु आन्यतम्यं भजते आचार्यहरिभास्कर-अग्निहोत्रिविरचितः परिभाषाभास्करः। तद्ग्रन्थदिशा यदागमपरिभाषाया विमर्शः प्रकृतप्रबन्धे उपस्थाप्यते। परिभाषाभास्करे प्रकृतपरिभाषास्वरूपं तावत् "आगमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते" इत्याकारिका।

परिभाषार्थः, प्रयोजनम्, विचारः, ज्ञापकम्, समीक्षा चेति कोटिपञ्चकयुतो वर्ततेऽसौ प्रबन्धः। तत्र परिभाषार्थकोटौ परिभाषाया अर्थः सरलरीत्या लिखितः, प्रयोजनकोटौ ग्रन्थकृत्प्रदत्तोदाहणमुल्लिखितम्, विचारकोटौ उदाहरणस्य साङ्गत्यं, हरिभास्करकृतविचारः, परिभाषाया ज्ञापकानि च प्रदर्शितानि। एवञ्च समीक्षाभिधकोटौ तावत् ग्रन्थकृत्कृतविचारस्य युक्तताप्रदर्शनम्, ग्रन्थान्तरापेक्षया प्रकृतग्रन्थे परिभाषास्वरूपे ज्ञापके च स्थितस्य भेदस्य प्रदर्शनं च यथामति विहितं प्रबन्धोऽस्मिन्। मनोरमाकारेण धुड्विधौ धुगकरणे परिभाषाया हेतुत्वममन्यत। तत्प्रसङ्गे एव स्वग्रन्थे मनोरमाकारेण अत एव वक्ष्यमाणस्तुगिहैव न कृतः इत्याकारिका पङ्क्तिरुक्ता। एतत्पङ्क्तिस्थस्य एवकारस्य अयोगव्यवच्छेदार्थत्वं प्रतिपादितं परिभाषाभास्करकारेण हरिभास्करकारेण। तेन च चयो द्वितीया...इत्यादिवार्तिकप्राप्त-थकारापत्तिरूपदोषस्य तुगागमाकरणे हेतुत्वं निराकृतम्। प्रसङ्गेऽस्मिन् प्रकृतशोधप्रबन्धे एवकारस्य त्रैविध्यम् उदाहरणोल्लेखपुरःसरम् आलोचितम्। अन्ते च एवकारस्य अप्यर्थतापि प्रतिपादिता। एवमेव प्रकृतपरिभाषाबलादेव यासुडागमस्य उदात्तत्वे लब्धे पुनः सूत्रेण तद्विधानं

कुतः इत्येवमाशङ्कायां तत्समाधानं विस्तरेण प्रतिपादितम् प्रबन्धे।

एवं हरिभास्कराचार्येण प्रोक्तानि प्रकृतपरिभाषाया त्रीणि ज्ञापकानि सविस्तरं व्याख्यातम्। तत्र नागेशमते च ज्ञापकविषये को भेदः इत्यपि आलोचितं तत्र। परिभाषेन्दुशेखरे परिभाषास्वरूपे भेददर्शनात् कः पाठः युक्ततरः इत्यस्मिन् विषये स्वमतिः प्रकटिता मयेति शिवम्।

कूटशब्दाः – परिभाषा, आगमः, आगमी, ज्ञापकम्, अयोगव्यवच्छेदः।

## प्रस्तावना

परिदृश्यमानमखिलशास्त्रवाङ्मयमिदं शब्दशास्त्राधीनम्। ऋते शब्दशास्त्रं निखिलं विश्वं घनतमसि निमज्जेत्। सत्स्वपि ऐन्द्रादिषु[1] व्याकरणेषु सर्वतन्त्रस्वतन्त्रं पाणिनीयतन्त्रं स्वमहिम्ना राराज्यते। त्रिमुनि व्याकरणमिदं सर्वशास्त्रोपकारकत्वेन निखिलैरपि विद्वत्तल्लजैराद्रियते। तथाहि आभाणकम् –

"काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्।" इति।

वेदरक्षायै प्रवृत्तमदः शास्त्रं वेदाङ्गेषु प्राधान्यं भजन्निखिलशास्त्रोपकारकतामगात्। तस्मिंश्च सर्वशास्त्रोपकारके पाणिनीयशास्त्रे सन्ति कठोरतपःसमाः श्रमा विदुषाम्। तत्तपःफलकुसुमैर्मण्डितेयं व्याकरणस्रङ् नितान्तं शोभते संस्कृतमातुः शिरसि। ताञ्च स्रजं गुम्फितृषु विद्वद्वरेषु केचन प्रसिद्धिमिताः ,अपरे च कालप्रभावाद् विलीनाः समजायन्त। तादृशेनैव अप्रसिद्धेन केनचित् हरिभास्कराख्येन विदुषा रचितो ग्रन्थो हि परिभाषाभास्कर इति। परिभाषाणामुपरि लिखितेऽस्मिन् ग्रन्थे द्वात्रिंशदधिकशतं परिभाषा विलसन्ति। परिभाषेन्दुशेखरापेक्षया बहवो नूत्नविषयाः परिभाषाव्याख्यानावसरे ग्रन्थकारेणालोचिताः। इत्थं ग्रन्थकारकृतं परिभाषाणां मौलिकव्याख्यानं विदुषो दृष्टीश्चरीकृष्यते। तस्मिन्नेव परिभाषाभास्कराख्ये ग्रन्थे विद्यमाना " आगमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते" इति परिभाषा यथामति विचार्यते प्रकृतप्रबन्धे। तत्र परिभाषार्थः, प्रयोजनम्, विचारः, ज्ञापकम्, समीक्षा चेति कोटिपञ्चकयुतो वर्ततेऽसौ प्रबन्धः।

## परिभाषार्थः

आगमाः आगमिगुणीभूता भवन्ति अर्थाद् आगमिन अवयवा जायन्ते, अपि च आगमिबोधकशब्देन आगमविशिष्टं गृह्यते।

प्रयोजनम्

सर्वेषाम् इत्यत्र "बहुवचने झल्येत्"[2](७/३/१०३) इति एत्वम्।

विचारः

परिभाषायां तच्छब्देन आगमी बोध्यते। तेन तद्गुणीभूता इत्यस्यार्थस्तावद् आगमिगुणीभूताः इति, किञ्च तद्ग्रहणेन इत्यस्यार्थ आगमिग्रहणेन इति। गुणशब्दः प्रकृते अवयववाचको वर्तते। तेन आगमिगुणीभूताः इत्यस्य तात्पर्यं हि आगमिन अवयवा इति। तद्ग्रहणेनेत्यत्र ग्रहणशब्दः कर्तरि ल्युडन्तो[3] वर्तते। एवम् आगमिग्रहणेन इत्यस्यार्थो हि आगमिग्राहकेण अर्थाद् आगमिबोधकशब्देन इति। एवं तद्ग्रहणेन गृह्यन्ते इत्यस्यार्थो भवति आगमिबोधकशब्देन आगमविशिष्टं गृह्यते इति। अस्य तात्पर्यमेवं ग्राह्यं यद् आगमिगतधर्मा आगमविशिष्टे आरोप्यन्ते इति। यमुद्दिश्य आगमो विधीयते स आगम्यभिधीयते। यथा " आमि सर्वनाम्नः सुट्"[4](अष्टा.७/१/५२) इत्यनेन आम्-प्रत्ययमुद्दिश्य सुडागमो विधीयते। अतोऽत्र सुड् आगमः, आम् च आगमी। एवं प्रकृतपरिभाषानुसारं सुडागम आम्-प्रत्ययस्याववयो सञ्जायते। तेन आमो ग्रहणे सति 'साम्' इति सुड्विशिष्टस्य ग्रहणं भवति। अतोऽत्र आमो बहुवचनत्वधर्मस्य साम् इति आगमविशिष्टे आरोपे सति साम्-इत्यस्यापि बहुवचनत्वम्। तथा सति सर्व साम् इत्यवस्थायां साम्-इत्यस्य झलादिबहुवचनत्वेन सर्व-इत्यकारस्यैत्वं सिध्यति।

धुड्विधौ धुगकरणे परिभाषाया हेतुत्वम् - आचार्यो हरिभास्करः "डः सि धुट्"[5](अष्टा.८/३/२९) इति सूत्रस्थाने डः सि धुक् इति न्यासान्तराकरणे अस्याः परिभाषायाः कारणत्वमस्तीति प्रादर्शयत्। उक्तं च तेन "अत एव डः सि धुक् इति नाकारि" इति। अत्रायमाशयः डः सि धुट् इति सूत्रेण डकारात् परस्य सकारस्य धुडागमो विधीयते। तथाहि षड् सन्तः इत्यत्र सकारस्य धुडागमे टित्त्वाद् आद्यावयवे षड् ध् सन्तः इति स्थितौ "ष्टुना ष्टुः"(अष्टा.८/४/४१) इत्यनेन तवर्गीयस्य धकारस्य टवर्गीयेण डकारेण योगात् ष्टुत्वे प्राप्ते डकारस्य पदान्तत्वेन "न पदान्ताट्टोरनाम्"(अष्टा.८/४/४२) इत्यनेन ष्टुत्वनिषेधो जायते। ततः " खरि

च"(अष्टा.८/४/५५) इति धकारस्य चर्त्वे तकारे, डकारस्यापि चर्त्वे टकारे च षट्त्सन्तः इति रूपम्। अत्रैवं शङ्क्यते यत् प्रकृते "डः सि धुट्" इत्यत्र डः इति पदे पञ्चमीसत्त्वाद् डकारं निमित्तीकृत्य सकारस्य धुट्-इत्यागमो विधीयते। तदकृत्वा डः सि धुक् इति न्यासे कृते डः इत्यत्र षष्ठीस्वीकारेण डकारस्य आगमित्वं, सि इत्यत्र सप्तमीसत्त्वेन च सकारस्य परनिमित्तत्वं भवेत्। तदा सकारं निमित्तीकृत्य डकारस्य धुग् विधीयेत। तथाहि षड् सन्तः इत्यवस्थायां डकारस्य धुगागमे कित्त्वाद् अन्तावयवे षड् ध् सन्तः इति स्थितौ डकारधकारयोः चर्त्वे षट्त्सन्तः इत्येवं समानं रूपं सञ्जायते। अतो विनिगमनाभावात् कित्पक्षोऽपि शक्योऽङ्गीकर्तुमिति चेन्न कित्पक्षे डकारस्यागमित्वेन धुगागमो डकारावयवो जायते प्रकृतपरिभाषाबलात्। तथा सति षड् ध् सन्तः इत्यवस्थायां डकारावयवत्वेन धकारस्य पदान्तत्वं भवेत्। धकारस्य पदान्तत्वे तु तत्पूर्वस्य डकारस्य अपदान्तत्वात् पदान्ताट्टोः परस्यैव ष्टुत्वनिषेधात् "न पदान्ताट्टोरनाम्" इति ष्टुत्वनिषेधाप्राप्तिः प्रकृते। निषेधाभावाच्च तवर्गीयस्य धकारस्य टवर्गीयेण डकारेण योगाद् अनिष्टं ष्टुत्वं दुर्वारं स्यात्। तस्मात् टित्पक्ष एव आश्रेयः। पक्षेऽस्मिन् सकारस्यागमित्वेन आगमो धकारः सकारावययो भवति, न तु डकारावयवः। तेन डकारस्य पदान्तत्वाक्षुण्णत्वेन ष्टुत्वनिषेधो भवत्येव।

प्रौढमनोरमामतम् - डकारस्य किदागमकरणेन आगमस्य डकारावयत्वेन ष्टुत्वनिषेधाभावरूपदोषसत्त्वात् प्रौढमनोरमायां "डः सि धुट्" इति सूत्रव्याख्यानावसरे "अत एव वक्ष्यमाणस्तुगिहैव न कृतः"[6] इत्युक्तम्। अत्राशयस्तावद् डकारस्य धुगागमकरणेन यो दोषः प्रदर्शितः, स एव दोषो डकारस्य तुगागमकरणेऽपि प्रसज्येत। तस्मात् "शि तुक्"[7] (अष्टा.८/३/३१) इत्यत्र वक्ष्यमाणस्तुग् अत्र कर्तुं न शक्यते इति प्रौठमनोरमाशयः। परन्तु अत्र तुगागमाकरणे भिन्नं कारणम् आहुः केचित्। तथाहि तेषां मते तुगागमे कृते षड् त् सन्तः इत्यवस्थायां "चयोः द्वितीयाः शरि पौष्करसादेरिति वाच्यम्"(वा.) इति वार्तिकेन तकारस्य थकारापत्तिर्दोषः। एतच्च कारणं तुगागमाकरणे इति केषाञ्चिन्नयः। धुगागमे तु धकारस्य चर्त्वे तकारे "खरि च" इति विहितचर्त्वस्य वार्तिकदृष्ट्या असिद्धत्वेन न थकारादेशप्रसङ्गः। परन्तु तुगकरणे भिन्नकारणं कथयतां तेषां मतमयुक्तम् "अत एव" इत्यत्र एवकारस्य अयोगव्यवच्छेदार्थकत्वादिति ग्रन्थकाराशयः।

एवकारत्रैविध्यम् - एवकारस्तावत् त्रिविधः अयोगव्यवच्छेदार्थः, अन्ययोगव्यवच्छेदार्थः, अत्यन्तायोगव्यवच्छेदार्थश्च। विशेष्ये विशेषणस्य योऽयोगः अभावः तस्य व्यवच्छेदः अयोगव्यवच्छेद इत्यभिधीयते। विशेषणसंगत एवकारो हि अयोगव्यवच्छेदार्थो भवति। यथा शङ्खः पाण्डुर एव इत्यत्र शङ्खः पाण्डुरो न इत्याकारकस्याभावस्य व्यवच्छेदः क्रियते एवकारेण, तस्मादत्र एवकारः अयोगव्यवच्छेदार्थो वर्तते। अयोगव्यवच्छेदत्वं हि विशेषणे विशेष्यतावच्छेदकसमानाधिकरणाभावाप्रतियोगित्वम्।[8] प्रकृते शङ्खो विशेष्यः पाण्डुरत्वं हि विशेषणम्। विशेष्यतावच्छेदकं हि शङ्खत्वम्। शङ्खत्वसमानाधिकरणोऽत्यन्ताभावो घटाद्यभावः, तादृशाभावस्य प्रतियोगी घटादिः, अप्रतियोगि च पाण्डुरत्वम्, तस्य शङ्खे सत्त्वात्। अतः विशेष्यतावच्छेदकशङ्खत्वसमानाधिकरणाभावाप्रतियोगिपाण्डुरत्ववान् शङ्खः इत्यन्वयबोधः प्रकृते।

एवं विशेष्यसंगत एवकारः अन्ययोगव्यवच्छेदार्थो भवति। विशेष्येतरस्मिन् कस्मिंश्चित् पदार्थे विशेषणपदार्थस्य यो योगः सम्बन्धः, तस्य व्यवच्छेदोऽन्ययोगव्यवच्छेद इत्यभिधीयते। यथा पार्थ एव धनुर्धर इत्यादौ। प्रकृते धनुर्धरपदेन प्रशस्तधनुर्धरत्वं विवक्षितम्। एवं पार्थाद् इतरस्मिन् युधिष्ठिरादौ प्रशस्तधनुर्धरत्वस्य व्यवच्छेदः क्रियते एवकारेण। अर्थात् पार्थभिन्नोऽन्यः कोऽपि प्रशस्तधनुर्धरो नास्तीति तात्पर्यमत्र। एवं विशेषणे विशेष्यान्यवृत्त्यभावप्रतियोगित्वम् अन्ययोगव्यवच्छेदत्वम्।[9] प्रकृते पार्थो विशेष्यः, तदन्यो युधिष्ठिरादिः, तद्वृत्त्यभावः प्रशस्तधनुर्धरत्वाभावः, तत्प्रतियोगि प्रशस्तधनुर्धरत्वम्। एवं पार्थरूपविशेष्यान्ययुधिष्ठिरवृत्त्यभावप्रतियोगिधनुर्धरत्ववान् पार्थः इत्यन्वयबोधः प्रकृते।

क्रियासंगत एवकारोऽत्यन्तायोगव्यवच्छेदार्थो भवति। यथा नीलं सरोजं भवत्येवेति। अत्यन्तायोगव्यवच्छेदत्वं हि उद्देश्यताव्यवच्छेदकव्यापकाभावा-प्रतियोगित्वम्। अत्रोदाहरणे सरोजमुद्दिश्य नीलत्वविधानाद् उद्देश्यं सरोजम्, उद्देश्यतावच्छेदकं च सरोजत्वम्। सरोजत्वव्यापकः अत्यन्ताभावः घटाद्यभावः, न तु नीलाभेदाभावः कस्मिंश्चित्सरोजे नीलाभेदस्यापि सत्त्वात्। तादृशात्यन्ताभावा-

प्रतियोगित्वं नीलाभेदे वर्तते इति सरोजत्वव्यापकात्यन्ताभावाप्रतियोगिनीला-भेदवत्सरोजवम् इति बोधः प्रकृते जायते। इत्थम् एवकारत्रैविध्यं यथामति निर्वर्ण्य प्रकृतमनुस्त्रियते।

मनोरमापङ्क्तिस्थ-एककारतात्पर्यपर्यालोचनम् - मनोरमापङ्क्तौ अत एव इत्यस्य तात्पर्यं हि ष्टुत्वनिषेधाभावापत्तेरेव इति। अत्र एवकारोऽयोगव्यवच्छेदार्थः। तेन 'तुगकरणे ष्टुत्वनिषेधाभावापत्तिः कारणं न' इत्याकारकस्य अभावस्य व्यवच्छेदः क्रियतेऽत्र एवकारेण। एवम् एवकारबलात् निष्कर्षो लभ्यते यत् तुगकरणे ष्टुत्वनिषेधाभावापत्तिः कारणं न तु चयो द्वितीया...इत्यादि द्वितीयादेशापत्तिरिति। तस्मात् प्रकृते एवकारस्यायोगव्यवच्छेदार्थस्वीकारेण द्वितीयादेशापत्तिपक्षो निरस्यते। शिरोमणिमते एवकारस्य अन्ययोगव्यवच्छेदमात्रार्थत्वम्। परन्तु दण्डेनैव घट इत्यादौ अन्ययोगव्यवच्छेदार्थस्यासम्भवात् अयोगव्यवच्छेदस्यापि एवकारार्थत्वमस्त्येव इति प्राञ्चः। दण्डेनैव घटः इत्यत्र एवकारस्यान्ययोग-व्यवच्छेदार्थत्वे अङ्गीक्रियमाणे दण्डभिन्ने मृदादौ घटकारणत्वस्य व्यवच्छेदः स्यात्। परन्तु मृदादेरपि घटकारणत्वसत्त्वात् प्रकृते एवकारस्य अन्ययोगव्यवच्छेदार्थत्वम-सम्भवम्। तेनात्र अयोगव्यवच्छेदार्थ एवकारः स्वीकार्य एव। एवं प्रौठमनारमास्थपङ्क्तौ विद्यमानस्य एवकारस्य अयोगव्यवच्छेदार्थत्वे न कश्चिद्दोषः। अथवा अन्ययोगव्यवच्छेदार्थोऽपि एवकारस्तत्राङ्गीकर्तुं शक्य इति ग्रन्थकारः पक्षान्तरमुपस्थापयति। एवं तत्र ष्टुत्वनिषेधे तुगकरणहेतुत्वान्ययोगव्यवच्छेदः अङ्गीकार्यः। अथवा अत एव इत्यादौ एवकारस्य अप्यर्थो वर्तते इति तृतीयः पक्षः। तेन तत्र तुगकरणे ष्टुत्वनिषेधाभावापत्तिरपि हेतुः इत्येवं तात्पर्यं ग्राह्यम्। तथा सति तुगकरणे हेत्वन्तरसत्त्वेऽप्यदोषः। एवंरूपेण एवकारस्याप्यर्थत्वस्वीकारे तुगकरणे ष्टुत्वनिषेधाभावापत्तिर्द्वितीयादेशापत्तिश्चेति हेतुद्वयम् अङ्गीकर्तुं शक्यम्। एकस्य कार्यस्य उपायनानात्वे न दोषः। तथाहि न्यायः – " उपायस्योपायान्तरादूषकत्वमि"ति। आचार्यभर्तृहरिरपि वाक्यपदीये आह – "उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः"[10] इति। उपायस्य अर्थात् साध्यस्य ज्ञानार्थं उपाया अनिश्चिताः सन्ति। अर्थात् एकस्य साध्यस्य नानोपाया भवितुमर्हन्तीति तात्पर्यम्।

एवककारस्य अप्यर्थत्वस्वीकारः - एवम् एवकास्याप्यर्थत्वस्वीकारात् "न सम्प्रसारणे सम्प्रसारणम्"(अष्टा.६/१/३७) इति सूत्रे "अत एव ज्ञापकात् परस्य यणः सम्प्रसारणम्" इति दीक्षितपङ्क्तिस्थ एवकारः सङ्गच्छते। तथाहि युवन्-शब्दात् शसि " श्वयुवमघोनामतद्धिते"(अष्टा.६/४/१३३) इति सूत्रेण युवन्-शब्दस्य सम्प्रसारणं प्राप्नोति। युवन्-शब्दे य्-व्-इत्यनयोरुभयोरपि सम्प्रसारणे सम्भवे कतरस्य सम्प्रसारणं भवेदित्याकाङ्क्षायामुच्यते " न सम्प्रसारणे सम्प्रसारणम्" इति सूत्राज्ज्ञापकात् परस्य यणः पूर्वं सम्प्रसारणमिति। तज्ज्ञापकत्वं कथमिति चेत् युवन् शस् इत्यवस्थायां वकारस्य सम्प्रसारणे "सम्प्रसारणाच्च"(अष्टा.६/१/१०८) इति पूर्वरूपे च कृते यु उ न् अस् इत्येवंस्थितौ यकारस्यापि पुनः सम्प्रसारणे प्राप्ते "न सम्प्रसारणे सम्प्रसारणम्" इति निषेधात् सवर्णदीर्घे प्रक्रियायां यूनः इति रूपम्। परन्तु अत्र युवन् शस् इत्यवस्थायाम् आदौ यकारस्य सम्प्रसारणे सति इवन् शस् इत्येवंस्थितौ वकारस्य सम्प्रासरणं दुर्वारं स्यात् वकारानन्तरं सम्प्रसारणाभावात् न सम्प्रसारणे सम्प्रसारणम् इति सम्प्रसारणनिषेधाप्रवृत्तेः। एवं पूर्वस्य यणः पूर्वं सम्प्रसारणे सम्प्रसारणनिषेधस्य व्यर्थतापत्तौ निषेधोऽसौ व्यर्थीभूय ज्ञापकतामेति। एतद्व्याख्यानायैव भट्टोजिदीक्षितः न सम्प्रसारणे सम्प्रसारणम् इति सूत्रव्याख्यानावसरे आह "अत एव ज्ञापकात् परस्य यणः सम्प्रसारणम्" इति। पङ्क्तावस्यां प्रयुक्तस्य एवशब्दस्य हि अप्यर्थत्वं स्वीक्रियते। तदा पङ्क्तेस्तात्पर्यं लभ्यते यत् परस्य यणः पूर्वं सम्प्रासरणे सम्प्रसारणनिषेधरूपज्ञापकस्यापि हेतुत्वमिति। एवं सति परस्य यणः पूर्वं सम्प्रसारणे शब्दपरविप्रतिषेधस्यापि हेतुत्वमङ्गीकर्तुं शक्यम्। इत्थं शब्दपरविप्रतिषेधेनापि परस्य यणः पूर्वं सम्प्रसारणमिति वक्तुं शक्यम्। तच्च दीक्षितपङ्क्तिस्थैवकारस्य अप्यर्थत्वस्वीकारेण सङ्गच्छते।

यासुडागमस्य उदात्तत्वविधौ शङ्का परिहारश्च - परिभाषयानया आगमिगतधर्म आगमविशिष्टे आरोप्यत इति प्रतिपादितम्। परन्तु भूयादित्यादौ भूधातोराशीर्लिङि तिपि अनुबन्धलोपे प्रत्ययेकारलोपे प्रत्ययस्य यासुडागमे च कृते भू यात् इत्येवंस्थितौ " आद्युदात्तश्च"(अष्टा.३/१/३) इति सूत्रबलात् प्रत्ययस्यादिस्वरस्य उदात्तत्वविधानात् प्रकृतपरिभाषानुसारं यात्-इति आगमविशिष्टस्यैव प्रत्ययत्वात्, तदादिस्वरस्याकारस्योदात्तत्वे लब्धे पुनः "यासुट्

परस्मैपदेषूदात्तो ङिच्च"(अष्टा.३/४/१०३) इति सूत्रेण यासुट उदात्तत्वविधानं किमर्थमिति प्रश्नः। तत्समाधानं यद् यासुट उदात्तत्वविधानेन इदं ज्ञाप्यते यद् यासुडितरे सर्वे आगमा अनुदात्ता इति। केषाञ्चन मते एतज्ज्ञापनफलं हि 'तस्यां सुपर्णा वृषणा' इत्यादौ स्याडागमस्यानुदात्तत्वाद् विभक्तस्वरबाधनम्। तथाहि प्रकृते तस्यामित्यत्र तच्छब्दाद् ङौ ङेरामादेशे स्याडागमे च कृते पूर्वोक्तज्ञापनात् स्याडागमस्यानुदात्तत्वं भवति। तत्र च "सावेकाचस्तृतीयादिर्विभक्तिः" (अष्टा.६/१/१६८) इति सूत्रेण स्याडागमस्य उदात्तत्वं प्राप्नोति। तत्र स्याडागमस्य ज्ञापकसिद्धेन अनुदात्तत्वेन सूत्रप्राप्तस्य विभक्तिस्वरस्य बाधो जायते इति केषाञ्चिन्मतम्। अन्येषां मते तावत् प्रकृते तच्छब्दस्य प्रथमैकवचने अवर्णान्तत्वेन "न गोश्वन्सावववर्णराडङ्क्रुङ्कृद्भ्यः"(अष्टा.६/१/१८२) इति सूत्रेण "सावेकाचस्तृतीयादिर्विभक्तिः" इति सूत्रप्राप्तो विभक्तिस्वरो निषिध्यते, न त्वत्र आगमानुदात्तत्वेन विभक्तिस्वबाधनम्। वस्तुतोऽत्र स्याडागमस्यानुदात्तत्वेन विभक्तिस्वरस्य बाधे सत्यपि न काचित्क्षतिर्जायते। यतो हि तच्छब्दाद् ङौ ङेरामादेशे स्याडागमे च कृते 'त स्या आम्' इत्यवस्थायां स्या-इत्याकारस्य ज्ञापकसिद्धमनुदात्तत्वम्, आम्-इत्याकारस्य " आद्युदात्तश्च"(३/१/३) इत्युदात्तत्वम्। तत्र "अकः सवर्णे दीर्घः"(६/१/१०१) इति सूत्रेण आकारयोः स्थाने आकारैकादेशे "एकादेश उदात्तेनोदात्तः"(८/२/५) इति सूत्रबलाद् एकादेशभूतस्याकारस्य उदात्तत्वमेव भवति। परन्तु स्थलेऽस्मिन् आगमानुदात्तत्वेन विभक्तिस्वरस्य बाधे क्षत्यभावदर्शनेनापि परिभाषाभास्करकारनये तु आगमानुदात्तेन विभक्तिस्वरबाधो न भवतीति बोध्यम्। अत एव विभक्तिस्वरबाधनमतमुक्त्वा 'इति केचित्' इत्येवं प्रतिपादितम्।

परिभाषाज्ञापकम्

अस्याः परिभाषाया ज्ञापकत्रयं प्रदर्शितं ग्रन्थकारेण। तत्र "णेरनिटि"[11] (अष्टा.६/४/५१) इति सूत्रे अनिङ्ग्रहणं परिभाषामिमां ज्ञापयतीति केषाञ्चिन्नयः। तथाहि "णेरनिटि" इति सूत्रेण कार्यते इत्यादौ अनिडादावार्धधातुके परे णिच्प्रत्ययस्य लोपो विधीयते। कारयिता इत्यादौ इडादावार्धधातुके परे यथा णिलोपो न स्यादित्येतदर्थं सूत्रे अनिङ्ग्रहणम्। परन्तु सूत्रे अनिङ्ग्रहणाभावेऽपि कारयिता इत्यादौ

कारि इता इत्यवस्थायाम् ता-इत्यार्धधातुकस्य परत्वाभावाद्, इटः परत्वेऽपि तस्यार्धधातुकत्वाभावाद् णिलोपस्य प्राप्तिरेव नास्तीति अनिड्ग्रहणस्य व्यर्थतापत्तिः। तच्च अनिड्ग्रहणं व्यर्थीभूय प्रकृतपरिभाषां ज्ञापयतीति केषाञ्चिदाशयः। ज्ञापितायां च परिभाषायां कारि इता इत्येवंस्थितौ आगमविशिष्टस्यार्धधातुकत्वाद्, आर्धधातुकस्य परत्वेन सत्त्वाद् णिलोपे प्राप्ते, तद्वारणाय कृतम् अनिड्ग्रहणं सार्थकतामेति।

अन्येषां मते तु " नेटि"[1 2] (अष्टा.७/२/४) इति सूत्रेण विहितस्य वृद्धिनिषेधस्य परिभाषाज्ञापकत्वम्। तथाहि "नेटि" इति सूत्रेण अदेवीत् इत्यादौ "वदव्रजहलन्तस्याचः"[13](अष्टा.७/२/३) इति सूत्रप्राप्तवृद्धेर्निषेधो विधीयते। परन्तु सूत्राभावेऽपि अदेवीत् इत्यादौ दिव्-धातोर्लुङि अडागमे तिपि सिचि सिच इटि तिप ईटि च कृते अदेव् इस् ईत् इत्यवस्थायाम् अदेव्-इति हलन्ताङ्गात् परम् इटः सत्त्वेन सिजभावाद् "वदव्रजहलन्तस्याचः" इति वृद्धेः प्राप्तिरेव नास्ति, सिचि परे तद्विधानात्। तथा सति वृद्धेः प्राप्त्यभावे "नेटि" इति निषेधस्य व्यर्थापत्तिः। स च निषेधो व्यर्थीभूय परिभाषामिमां ज्ञापयतीति अन्येषामाशयः। ज्ञापितायां च परिभाषायां आगमविशिष्टस्य इस्-इत्यस्य सिच्त्वेन सिचः परत्वलाभाद् वृद्धौ प्राप्तायां तन्निषेधाय कृतं "नेटि" इति सूत्रं सार्थकतामेति।

अपरेषां मते तु "पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्"(अष्टा.१/१/३४) इति सूत्रस्थः अधराणि इति निर्देशः प्रकृतपरिभाषां ज्ञापयति। तथाहि अधरशब्दाज् जसि जसः श्यादेशे अधरशब्दस्य "नपुंसकस्य झलचः"(अष्टा.७/१/७२) इति नुमागमे अधरन् इ इति स्थिते "सर्वनामस्थाने चासम्बुद्धौ"(अष्टा.६/४/८) इति सूत्रेण सर्वनामस्थाने परे अङ्गस्योपधावृद्धिः कर्तव्या। परन्तु " सर्वनामस्थाने चासम्बुद्धौ" इति सूत्रेण नान्तस्याङ्गस्योपाधाया वृद्धिः क्रियते। प्रकृते तु अधर-इत्यस्य अङ्गत्वेन, तस्य च नान्तत्वाभावाद् उपधावृद्धेरप्राप्तिः। एवं स्थितौ उपधावृद्ध्यभावे भगवता पाणिनिना कृतः अधाराणि इति निर्देशोऽनुपन्नः सन् प्रकृतपरिभाषां ज्ञापयतीत्यपरे आहुः। ज्ञापितायां च परिभाषायां आगमभूतस्य नकारस्याधरशब्दावयवत्वम्। तदा अधरन्-इति आगमविशिष्टस्याङ्गत्वेन नान्ताङ्गत्वलाभाद् उपधावृद्धौ सत्याम् अधराणि इति रूपं सिध्यति।

## उपसंहारः

आचार्यो हरिभास्करः परिभाषाभास्करे प्रकृतपरिभाषाया ज्ञापकत्रयं प्रादर्शयत्। तानि हि "णेरनिटि"(अष्टा. ६/४/५१) इत्यत्र अनिड्ग्रहणम्, "नेटि"(अष्टा.७/२/४) इति वृद्धिनिषेधः, पूर्वपरावर...इत्यादिसूत्रे अधराणि इति निर्देशश्च। परन्तु आचार्यनागेशेन लोकन्यायसिद्धत्वम् अस्या अङ्गीकृतम्। लोके एवं दृश्यते यत् कस्यचित् पुरुषस्याङ्गाधिक्ये सति अधिकाङ्गविशिष्ट एव तत्पुरुषग्रहणेन गृह्यते। तद्वद् आगमविशिष्टस्यैव आगमिग्रहणेन ग्रहणमित्येवं लोकसिद्धेयं परिभाषा। उक्तं हि परिभाषेन्दुशेखरे "लोकेऽपि देवदत्तस्याङ्गाधिक्ये तद्विशिष्टस्यैव देवदत्तग्रहणेन ग्रहणं दृश्यते"[14] इति। तत्र च परिभाषाफलरूपेण "णेरनिटि", "नेटि" इत्यादीनां चारितार्थ्यं प्रदर्शितम्।

परिभाषेन्दुशेखरात् परिभाषास्वरूपमपि भिद्यते परिभाषाभास्करे। तथाहि परिभाषेन्दुशेखरे परिभाषास्वरूपं तावत् "यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते"(प.शे.११) इति। प्रकृतग्रन्थे परिभाषस्वरूपं हि "आगमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते"(प.भा.४) इति। एवं प्रकृतग्रन्थे यच्छब्दो न परिभाषाघटको वर्तते। परन्तु यत्तच्छब्दयोः सापेक्षत्वात् तच्छब्दसत्त्वे तच्छब्दोत्पन्नाकाङ्क्षायाः परिपूरकत्वेन यच्छब्दप्रयोग आवश्यक एव। अतः परिभाषेन्दुशेखरस्थपाठ एव युक्ततां भजते। न केवलं परिभाषेन्दुशेखरे पाठोऽयं वर्तते, अपि तु काशिकादिष्वपि स पाठः परिलक्ष्यते। "नेर्विशः"(अष्टा.१/३/१७) इति सूत्रे काशिकायां, न्यासे, पदमञ्जर्यां, वैयाकरणसिद्धान्तकौमुद्याम् इत्यादिषु सर्वत्रैव 'यदागमाः' इत्येव पाठः परिलक्ष्यते। यदागम इत्यत्र षष्ठीसमासो विद्यते, उद्देश्यत्वं हि तत्र षष्ठ्यर्थः। अत आचार्यनागेशेन यदागमाः इति शब्दस्य "यमुद्दिश्य आगमो विहितः" इत्येवं व्याख्यानं कृतम्।

इत्थं परिभाषाभास्करदिशा यदागमपरिभाषायाः विचारः प्रस्तुतः प्रबन्धेऽस्मिन्।

## सन्दर्भाः-

1. ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।

सारस्वतं चापिशलं शाकलं पाणिनीयकम्॥

2. झलादौ बहुवचने सुपि परेऽतोऽङ्गस्यैकारः स्यात्। (सि.कौ. पृ.२७)
3. कृत्यल्युटो बलुहम् इति बाहुलकात् कर्तरि ल्युट्।
4. अवर्णान्तात्परस्य सर्वनाम्नो विहितस्यामः सुडागमः स्यात् । (सि.कौ. पृ.२७)
5. डात्परस्य सस्य धुड्वा स्यात्. (सि.कौ.पृ.१७)
6. डः सि धुट्"(अष्टा.८/३/२९) इति सूत्रे प्रौढमनोरमा
7. पदान्तस्य नस्य शे परे तुग्वा स्यात्. (सि.कौ. पृ.१८)
8. तर्कामृतम्
9. तर्कामृतम्
10. वाक्यपदीयम्
11. अनिडादावार्धधातुकेपरे णेर्लोपः स्यात् ।(सि.कौ.पृ.२७५)
12. इडादौ सिचि प्रागुक्तं(हलन्तस्याङ्गस्य वृद्धिः) न स्यात् ।(सि.कौ.पृ.२६५)
13. वदेर्व्रजेर्हलन्तस्य चाङ्गस्याचः स्थाने वृद्धिः स्यात्सिचि परस्मैपदेषु ।(सि.कौ.पृ.२६५)
14. परिभाषेन्दुशेखरः (परिभाषा - ११)

## अवलोकितग्रन्थसूची


I. अभ्यङ्करोपाह्व-वासुदेवशास्त्रिसूतमहामहोपाध्यायकाशिनाथः (सम्पादकः, सङ्कलकश्च), (१९६७), परिभाषासंग्रहः, पुणे: भण्डारकरप्राच्यविद्यासंशोधनमन्दिरम्।

II. भट्टः, श्रीनागेशः (२०१६), परिभाषेन्दुशेखरः सुबोधिनीहिन्दीव्याख्योपेतः, व्याख्याता मिश्रः श्रीविश्वनाथः, वाराणसी: चौखम्बा सुरभारती प्रकाशन।

III. भट्टः, श्रीनागेशः,( १९९१), परिभाषेन्दुशेखरः हैमवतीटीकया सम्वलितः, सम्पादकः शुक्लः पण्डितश्रीकालिकाप्रसादः, वाराणसी: सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः।

IV. दीक्षितः, भट्टोजिः, ( २००३), प्रौढमनोरमा (अव्ययीभावान्तो भागः) लघुशब्दरत्न-भैरवी-भावप्रकाश-सरला-टीकाभिः संवलिता, , वाराणसी: चौखम्बा संस्कृत संस्थान।

V. पाणिनिः, पुष्पा दीक्षितः, (२०१०) अष्टाध्यायीसूत्रपाठः दीक्षितपुष्पाकृतप्रकरणनिर्देशसमन्वितः, नवदेहली: संस्कृतभारती।

VI. वामनजयादित्यौ, (१९९०) काशिका न्यास-पदमञ्जरी-भावबोधिनी-सहिता (सप्तमो भागः), सम्पादकःत्रिपाठी, डा. जयशङ्करलालः, वाराणसी: तारा बुक एजेन्सी।

VII. दीक्षितः, भट्टोजिः, (२०१२) वैयाकरणसिद्धान्तकौमुदी (प्रथमो भागः), भट्टोजिदीक्षितः, गिरिधरशर्मा, परमेश्वरानन्दशर्मा च (सम्पादकौ), दिल्ली: मोतीलाल बनारसीदास.

VIII. दीक्षितः, भट्टोजिः, (२०१२) वैयाकरणसिद्धान्तकौमुदी (द्वितीयो भागः), भट्टोजिदीक्षितः,

गिरिधरशर्मा, परमेश्वरानन्दशर्मा च (सम्पादकौ), दिल्ली: मोतीलाल बनारसीदास.

IX. दीक्षितः, भट्टोजिः, (२०१२) वैयाकरणसिद्धान्तकौमुदी (तृतीयो भागः), भट्टोजिदीक्षितः, गिरिधरशर्मा, परमेश्वरानन्दशर्मा च (सम्पादकौ), दिल्ली: मोतीलाल बनारसीदास.

❋ ❋ ❋